# संस्कृत-वार्ता:

दिनाङ्कः 08/05/2025 सायम् - 06:20

आदौ मुख्यवार्ता:

- सिंदूराभियानमिति विषयमवलम्ब्य समाहूते सर्वदलीयोपवेशने सर्वैः प्रमुखराजनीतिकदलीय-नेतृभिः भागं गृहीतम्।
- भारतीयसशस्त्रसेनया अद्य प्रातः पाकिस्तानस्य अनेकस्थलेषु वायुरक्षा-रडार इत्युपकरण-प्रणाल्योपरि आक्रमणं कृतम्। रक्षामन्त्रालयानुसारं लाहौरनगरे वायुरक्षाव्यवस्था निष्प्रभाविनी जातास्ति।
- अद्य प्रातः उत्तराखण्डस्य उत्तरकाशी-मण्डले उदग्रविमान-दुर्घटनायां षट् तीर्थयात्रिणः मृताः।
- ऋतुविज्ञानविभागेन प्रोक्तमिस्ति यत् पूर्व-पश्चिम-मध्य-पूर्वोत्तरीयक्षेत्रेषु अग्रिमपञ्चदिवसेषु धारासारवृष्टे: सम्भावना अस्तीति।
- आईपीएल् इति क्रिकेट्-क्रीडा-मालिकायां पञ्जाब-किङ्ग्स्-दलम् अद्य धर्मशाला-नगरस्य क्रिकेट्-क्रीडाङ्गणे दिल्ली-कैपिटल्स्-दलं सम्मुखी करिष्यति।

-------------------------------------

## सर्वकारस्य सर्वदलीयोपवेशनम्:

सर्वैः राजनीतिकदलीय-नेतृभिः अद्य भारतीयसैन्यशक्तेः प्रशंसा कृता। सिंदूराभियानमिति विषयमवलम्ब्य समाहूतेऽस्मिन् सर्वदलीयोपवेशने रक्षामन्त्रिणा राजनाथसिंहेन अध्यक्षता कृता। उपवेशनेऽस्मिन् द्वादशाधिकदलानां नेतृभिः सहभागिता कृता। उपवेशनावधौ, श्री सिंहेन नेतारः अभियानमुद्देश्य प्रचोदिताः। यस्मिन् भारतेन पाकिस्तानसहित पाकाधिकृत-कश्मीरे नवाधिकेषु आतङ्कवादिस्थलेषु आक्रमणम् कृतम्। उपवेशनानन्तरं वार्ताहरान् संसूचयन् संसदीयकार्य-मन्त्रिणा किरेन-रिजिजू इत्यनेन उपवेशनमिमं रचनात्मकमिति प्रोक्तम्, तेनोक्तञ्च यत् प्रत्येकं नेत्रा परिपक्वतया कर्तव्यपरायणतया च स्वकीयाः विचाराः व्यक्तीकृताः। तेनोक्तं यत्

दलविचारमतिक्राम्य, राजनीतिक-नेतृभिः प्रोक्तं यत् महत्वपूर्णेऽस्मिन्काले राजनीत्यर्थं नावकाशोऽस्तीति।

कांग्रेसाध्यक्षेण मल्लिकार्जुन खड़गे इत्यनेन उपवेशनावधौ प्रशासनाय आत्मनः पूर्णसमर्थनं व्यक्तीकृतम्।

लोकसभायां विपक्षस्य नेत्रा राहुलगान्धिनापि सममेवविचारः प्रकटीकृतः। एआईएमआईएम इति दलस्य नेत्रा असदुद्दीन ओवैसी इत्यनेन सिंदूराभियानाय सशस्त्रबलानां प्रशासनस्य च प्रशंसा कृता। केन्द्रीयगृहमन्त्री अमितशाहः, विदेशमंत्री डॉ. एस. जयशंकरः, भाजपाध्यक्षः जेपी नड्डाः, समाजवादी पार्टीति दलस्य नेता रामगोपाल यादवः, टीएमसी नेता सुदीप बंद्योपाध्यायः, डीएमके नेता टी आर बालूः, एलआईपी नेता केन्द्रीय मंत्री च चिराग पासवानः, टीडीपी नेता लवू श्रीकृष्ण देवरायलुः, जेडी(यू) नेता संजयझाः, एनसीपी नेता प्रफुल्ल पटेलः इत्यादयः अनेके नेतारः उपवेशनेऽस्मिन् भागम् अभजन्।

---

__रक्षा-पाकिस्तानदेशः__

भारतीयसशस्त्रसेनया अद्य प्रातः पाकिस्तानस्य अनेकस्थलेषु वायुरक्षा-रडार इत्युपकरण-प्रणाल्योपरि लक्ष्यी कृत्वा आक्रमणं कृतम्। रक्षामन्त्रालयानुसारं लाहौरनगरे वायुरक्षाव्यवस्था निष्प्रभाविनी जातास्ति। मन्त्रालयेनोक्तं यत्, भारतीयप्रतिक्रिया पाकिस्तानसममेव तीव्रमासीत् आक्रमणञ्च तस्यैव क्षेत्रे अभवत्। पाकिस्तानेन गतरात्रौ ड्रोन्-मिसाइल- इत्यादि प्रक्षेपास्त्राणां प्रयोगेण अवन्तिपुरा, श्रीनगर, जम्मू, पठानकोट, अमृतसर, कपूरथला, जालन्धर, लुधियाना, आदमपुर, भटिण्डा, चण्डीगढ, नल, फलौदी, उत्तरलाई, भुज इत्यादिषु अनेकेषु सैन्यक्षेत्रेषु आक्रमणं कृतमासीत्। उत्तर-पश्चिम-भारतयोः अनेकानि सैन्यस्थलानि असफलतया पाकिस्तानेन लक्ष्यी कृतानि। एतानि एकीकृतकाउण्टर इति यूएएस ग्रिड्, वायुरक्षाप्रणालीभिः च निष्प्रभावीनि कृतानि। एतेषां आक्रमणानां सैन्यावशेषाः अधुना पाकिस्तानस्य आक्रमणानि सिद्धयन्ति इति मन्त्रालयेन उक्तम्। जम्मू-कश्मीरस्य कुपवाड़ा, बारामुल्ला, उरी, पुन्छ, मेन्धर,

राजौरी क्षेत्रेषु मोर्टार इत्येतैः महत् क्षमतायुतैः तोपाख्यास्त्रैश्च नियन्त्रणरेखायाः पारं पाकिस्तानेन अप्रोत्साहितस्य गुलिकाकाण्डश्च तीव्रतया वर्धितास्ति। मन्त्रालयेन उक्तं यत्, पाकिस्तानस्य गोलीकाण्डस्य कारणेन तिस्रः महिलाः पञ्च बालकाः च आहत्य प्रायः षोडश निर्दोषाणां प्राण हानिः अभवदिति।

---------------------------------------

## जयशंकर - ईरान विदेशमन्त्री :

विदेशमन्त्री एस.जयशंकरः अवदत् यत् सद्यः एव पहलगामातङ्क्याक्रमणस्य विषये भारतस्य प्रतिक्रिया "लक्षिता, परिमापिता च" आसीत् यस्योद्देश्यं सीम्नः पारेस्थानाम् आतङ्कीनां आधारभूतसंरचनानां नाशनमस्ति न तु संघर्षस्याभिवर्धनमिति। इरानस्य विदेशमन्त्री डॉ. सैयद अब्बास अराघची इत्यनेन सह विंशतितमे भारत-ईरान-संयुक्त-आयोगोपवेशने प्रवदन् श्रीजयशंकरः उक्तवान् यत् यदि भारते भविष्ये कथञ्चिदपि सैन्याक्रमणं भविष्यति तर्हि तस्य "अति-दृढ-प्रतिक्रिया" भविष्यति। वर्धमानक्षेत्रीय-मध्यसंघर्षे चतुर्विंशत्यधिक द्विसहस्रतम वर्षस्य अगस्तमासे कार्यभार ग्रहणानंतरम् अराघचेः एषा प्रथमा भारतयात्रा अस्ति। देशद्वयं भारत-ईरान-मैत्रीसन्धेः पञ्च सप्ततितमं वर्षं आमानयति। उभौ देशौ द्विपक्षीयसम्बन्धानां सुदृढीकरणस्य, क्षेत्रीयसहकार्यस्य च विषये चर्चां कृतवन्तौ ।

---------------------------------------

## राजनाथ - सिन्दूरम्

रक्षामन्त्री राजनाथसिंहः उक्तवान् यत् ऑपरेशन सिन्दूर इत्यस्यान्तर्गतं नव आतङ्कवादीशिबिराणि नष्टानि, बहुसंख्यायाम् आतङ्कवादिनः च मारिताः। अद्य नवदिल्ल्यां राष्ट्रियगुणवत्तासम्मेलने प्रवदन् श्रीसिंहः देशस्य सशस्त्रसैनिकानां तेषां कार्याणां, शौर्यस्य च अभिनन्दनं कृतवान्। सः अवदत् यत्, पाकिस्ताने, पीओके इत्यत्र च सशस्त्रसेनया यथा आतङ्कि-शिबिराणि नष्टानि, तत् देशस्य कृते गौरवस्य विषयः अस्ति।

---------------------------------------

## उत्तरकाशी-उदग्रविमान-दुर्घटना-

उत्तराखण्डे अद्य प्रातः उत्तरकाशी-मण्डलस्य गंगनानीति स्थल-समीपे उदग्रविमान-दुर्घटनायां षट् तीर्थयात्रिणः मृताः, एकश्च व्रणितः। निजोद्योगस्य उदग्रविमानं देहरादूनस्य सहस्त्रधारा हेलीपैडिति स्थलतः खरसाली हेलिपैड् पर्यन्तं उड्डयन्नासीत् तदैवेषा दुर्घटना जाता। गढ़वालस्य मण्डलायुक्तः विनयशंकरपाण्डेयः तत्क्षणमेव साहाय्योद्धार-कार्याणि आरब्धानीति उक्तवान्। दुर्घटनानन्तरं स्थानीयारक्षिबलं, स्थानीयदण्डाधिकारी, एसडीआरएफ-इति दलञ्च दुर्घटनास्थलं यावत् प्राप्तवत्।

---------------------------------------

## भारतर्तुविज्ञानविभागः

आगामिषु पञ्चदिवसेषु उत्तरपश्चिम-मध्यभारतयोः उपरि -विद्युल्लतया सह घोषझञ्झावातादि-सहितवृष्टेः पूर्वानुमानं कृतमस्ति। विभागेन अद्य एतेषु प्रदेशेषु ओलावृष्टिना सह तीव्रवायोः च सम्भावना प्रकटितास्ति। मई-मासस्य एकादश दिनाङ्कपर्यन्तं पूर्वोत्तरभारते वज्रपातेन, विद्युद्द्योतेन च सह प्रचण्डवृष्टेः सम्भावना अस्ति। अद्यारभ्य पूर्वभारते तीव्र तापतरङ्गस्य आरम्भस्यापि पूर्वानुमानम् ऋतुविभागेन कृतमस्ति। ओडिशा-तमिलनाडु-पुडुचेरी-करैकाल-केरल-माहे इति क्षेत्रेषु उष्ण-आर्द्र-वायोः प्रवाहस्य सम्भावना अस्ति। आगामिषु त्रिषु सप्ताह्नेषु च उत्तरपश्चिम-पूर्वभारतयोः अधिकतमतापमाने क्रमेण त्रीणि तः पञ्च डिग्री सेल्सियसपर्यन्तं वृद्धिः अपि भविष्यति।

---------------------------------------

## आईपीएल् क्रिकेट्

आईपीएल् इत्येतस्यां क्रिकेट्-क्रीडा मालिकायां पञ्जाब-किङ्ग्स्-दलम् अद्य सायं धर्मशाला-नगरस्य हिमाचल-प्रदेश-क्रिकेट्-एसोसिएशन-क्रीडाङ्गणे दिल्ली-कैपिटल्स्-दलं सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति। गतरात्रौ इडेन् गार्डन्स् क्रीडाङ्गणे अन्तिमक्षेपचक्रे-रोमाञ्चकरी-क्रीडायां चेन्नै-सुपर-किङ्ग्स्- दलेन कोलकाता-नाइट्-राइडर्स्-दलं द्वाभ्यां स्तोभाभ्यां पराजितम्।

।। इति वार्ता ।।